तेनैव कारयेत् पूजां दृष्ट्वा शास्त्रानुसारतः ।
आचार्य्यवचनाद्धीमान् पूजां कुर्य्याच्चरन् व्रतम् ॥”
तत्रादौ प्रह्लादः पूजनीयः । तथा चागमे ।
“प्रह्लादक्लेशनाशाय या हि पुण्या चतुर्द्दशी ।
पूजयेत्तत्र यत्नेन हरेः प्रह्लादमग्रतः ॥”
नारसिंहे ।
“मण्डपं कारयेत्तत्र पुष्पस्तवकशोभितम् ।
ऋतुकालोद्भवैः पुष्पैः पूज्योऽहञ्च यथाविधि ॥
उपचारैः षोड़शभिर्म्मन्त्रैर्नामभिस्तथा ।
ततः पौराणिकैर्म्मन्त्रैः पूजनीयो विशेषतः ॥”
तत्र चन्दनमन्त्रः ।
“चन्दनं शीतलं दिव्यं चन्द्रकुङ्कुममिश्रितम् ।
ददामि ते प्रसुत्यर्थं नृसिंह परमेश्वरेति ॥”
पुष्पमन्त्रः ।
“कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो ।
पूजयामि नृसिंहेश ! लक्ष्म्या सह नमोऽस्तु ते ॥”
धूपमन्त्रः ।
“कालागुरुमयं धूपं सर्व्वदेवसुवल्लभम् ।
करोमि ते महाविष्णो ! सर्व्वकामसमृद्धये ॥”
दीपमन्त्रः ।
“दीपः पापहरः प्रोक्तस्तमसां राशिनाशकः ।
दीपेन लभते तेजस्तस्माद्दीपं ददामि ते ॥”
नैवेद्यमन्त्रः ।
“नैवेद्यं सौख्यदं चास्तु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्व्वपापक्षयं कुरु ॥”
अर्घमन्त्रः ।
“नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः स्युर्म्मनोरथाः ॥”
पूजामन्त्रः ।
“पीताम्बर महाविष्णो प्रह्लादभयनाशन ।
यथा भूतार्च्चने नाथ यथोक्तफलदो भवेति ॥
रात्रौ जागरणं कुर्य्यात् गीतवादित्रनर्त्तनैः ।
पुराणपठनं कृत्यं श्रोतव्यं भक्तयानकम् ॥
ततः प्रभातसमये स्नानं कृत्वा ह्यतन्द्रितः ।
पूर्व्वोक्तेन विधानेन पूजयेच्च प्रयत्नतः ॥”
किञ्च ।
“मद्वंशे ये नरा जाता ये जनिष्यन्ति मत्पुरः ।
तांस्त्वमुद्धर देवेश ! दुःसहात् भवसागरात् ॥
पातकार्णवमग्नस्य व्याधिदुःखाम्बुराशिभिः ।
तीव्रैस्तु परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीराम्बुधिनिवास त्वं प्रीयमाणो जनार्द्दन ।
व्रतेनानेन मे देव भुक्तिमुक्तिप्रदो भव ॥
एवं प्रार्थ्य ततो देवं विसर्ज्ज्य च यथाविधि ।
उपहारादिकं सर्व्वमाचार्य्याय निवेदयेत् ॥
दक्षिणाभिः सुसन्तोष्य ब्राह्मणांश्च विसर्ज्जयेत् ।
समध्यानसमासक्तो भुञ्जीत सह बन्धुभिरिति ॥”
इति श्रीहरिभक्तिविलासे १४ विलासः ॥

नृसेनं, क्ली स्त्री, (नृणां सेना । “विभाषा सेनेति ।” २ । ४ । २५ । इति पाक्षिकं क्लीवत्वम् ।) नृणां सेना । इत्यमरः । ३ । ५ । ४० ॥

नृसोमः, पुं, ( ना सोमश्चन्द्र इव । इत्युपमितिसमासः । ) नरश्रेष्ठः । यथा, रघौ । ५ । ५९ ।
“तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सरितो नृसोमः ।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं
जग्राह तस्मान्निगृहीतशापात् ॥”

नृहरिः, पुं, ( ना चासौ हरिश्चेति । ) नृसिंहावतारः । यथाह बोपदेवः ।
“शेते स विश्वप्रथने मम मीनकूर्म्म-
कोलोऽभवन्नृहरिवामनयामदग्न्याः ।
योऽभूद्रघूद्भव भरताग्रजकृष्णबुद्धः
कल्की मतश्च भविता शहरिश्रितेऽरीन् ॥”
(यथा च भागवते । ७ । ८ । २७ ।
“तं मन्यमानो निजवीर्य्यशङ्कितं
यद्धस्तमुक्तो नृहरिं महासुरः ॥”)

नॄ, णि नीतौ । कविकल्पद्रुमः ॥ ( क्र्यां-पां-परं-सकं-सेट् । ) णि, नृणाति नीर्णः नीर्णिः । नीतिः प्रापणा । इति दुर्गादासः ॥

नॄ, र नीतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-णिचि घटां-सकं-सेट् ।) र, नरयति । नीतिः प्रापणा । इति दुर्गादासः ॥

नेजकः, पुं, ( णिज शुद्धौ+ण्वुल् । ) निर्णेजकः । रजकः । (यथा, मनौ । ८ । ३९६ ।
“शाल्मले फलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥”
( शोधके, त्रि ॥ )

नेता, [ ऋ ] पुं, ( नयतीति । णी+तृच् । ) प्रभुः । इत्यमरः । ३ । १ । ११ ॥ ( यथा, रघौ । ३ । ७५ ।
“व्यासम्रोधयो नेतुर्नैकमस्वेहदीपिकाः ॥”)
निम्बवृक्षः । इति राजनिर्घण्टः ॥ प्रापके, त्रि । ( यथा, महाभारते । १ । ९९ । ९ ।
“तिष्ठ त्वं स्थावर इव यावदेव नरः क्वचित् ।
इतो नेता हि तत्र त्वं शापान्मोक्ष्यसि यत्-
कृतात् ॥” )

नेत्रं, क्ली, ( नीयते नयति वानेनेति । “दाम्नीशसेति ।” ३ । २ । १८२ । इति करणे ष्ट्रन् । ) चक्षुः । ( यथा, मनुः । ४ । ४४ ।
“नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ।
न पश्येत् प्रसवन्तीञ्च तेजस्कामो द्विजोत्तमः ॥”)
वटा । अंशुकम् । इत्यमरः । २ । ६ । ११३, ३।३।१७९ ॥ मन्थगुणः । ( यथा, महाभारते । १ । १८ । १३ ।
“मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ।
देवा मथितुमारब्धाः समुद्रं निधिमम्भ-
साम् ॥”)
वृक्षमूलम् । रथः । नेतरि, त्रि । इति मेदिनी । रे, ५४ ॥ ( यथा, महाभारते । २ । ६० । ४ ।
“नावं समुद्र इव बालनेत्रा-
मारुह्य घोरे व्यसने निमज्जेत् ॥” )
नाड़ी । इति विश्वः ॥ वस्तिशलाका । इति राजनिर्घण्टः ॥

नेत्रच्छदः, पुं, ( नेत्रे छाद्यतेऽनेनेति । छद+णिच्+कः । ततो ह्रस्वः । ) नेत्रपिधायकचर्म्मपुटः । चक्षुर पाता इति भाषा । इति वर्त्मशब्दस्य नानार्थे अमरः । ३ । ३ । १२१ ॥

नेत्रपर्य्यन्तः, पुं, ( नेत्रयोः पर्य्यन्तः अन्तः । ) अपाङ्गः । इति राजनिर्घण्टः ॥ नयनावधिके, त्रि ॥

नेत्रपिण्डः, पुं, (नेत्रे नेत्रं वा पिण्ड इवास्य इति ।) विड़ालः । इति हारावली । ८६ ॥ चक्षुर्गोलकञ्च ॥

नेत्रपुष्करा, स्त्री, (नेत्रयोः पुष्करं जलं यस्याः यत्सेवनादित्यर्थः ।) रुद्रजटा । इति राजनिर्घण्टः ॥

नेत्रमीणा, स्त्री, ( नेत्रयोर्म्मिला मेलनं मुद्रणं यस्याः । ततः पृषोदरादित्वात् लस्य णत्वम् । क्वचित् नेत्रमिला इति वा पाठः । ) यवतिक्तालता । इति राजनिर्घण्टः ॥

नेत्रयोनिः, पुं ( नेत्राणि योनिभिर्ज्जातानि यस्य । अहल्यायोनय एव सहस्रनेत्राणि जातानि अतस्तन्नाम्ना विश्रुतः । नेत्राणि योनय इवास्येति वा । ) इन्द्रः । इति शब्दमाला ॥ ( नेत्रं अत्रिलोचनं योनिरुत्पत्तिकारणं यस्य । ) अत्रिनेत्रोद्भवत्वात् चन्द्रः ॥

नेत्ररञ्जनं, क्ली, ( रज्यतेऽनेनेति । रञ्ज+करणे ल्युट् । नेत्रस्य रञ्जनम् ।) कज्जलम् । यथा,—
“एष वो कथितो धूपः श्रूयतां नेत्ररञ्जनम् ।
येन तुष्यति कामाख्या त्रिपुरा वैष्णवी तथा ॥
सौवीरं जाम्बलं तुत्थं मयूरश्रीकरं तथा ।
दर्व्विका मेघनीलञ्च अञ्जनानि भवन्ति षट् ॥
सर्व्वरूपन्तु सौवीरं जाम्बलं प्रस्तरन्तथा ।
मयूरश्रीकरं रत्नं मेघनीलन्तु तैजसम् ॥
घृष्ट्वा निगाह्य चैतानि शिलायां तेजसाऽथवा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ॥
घृततैलादियोगेन ताम्रादौ दीपवह्निना ।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥
सर्व्वाभावे तु तद्दद्यात् देवीभ्यो दर्व्विकाञ्जनम् ।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा ॥
आप्नुवन्ति महातोषं षड्भिरेभिः सदाञ्जनैः ।
विधवा नाञ्जनं कुर्य्यान्महामायार्थमुत्तमम् ॥
नादद्यात् अञ्जनं देवी वैष्णवी विधवाञ्जनम् ।
न मृत्पात्रे योजयेत्तु साधको नेत्ररञ्जनम् ॥
न पूजाफलमाप्नोति मृत्पात्रविहिताञ्जनैः ॥
चतुर्व्वर्गप्रदो धूपः कामदं नेत्ररञ्जनम् ।
तस्माद्द्वयमिदं दद्याद्देवेभ्यो भक्तितो नरः ॥
इति वो कथितो धूपस्तथोक्तं नेत्ररञ्जनम् ॥”
इति कालिकापुराणे ६८ अध्यायः ॥

नेत्ररोगः, पुं, ( नेत्रस्य चक्षुषो रोगः । ) चक्षूरोगः । तस्य निदानं यथा,—
“उष्णाभितप्तस्य जलप्रवेशाद्-
दूरेक्षणात् स्वप्नविपर्य्ययाच्च ।
स्वेदाद्रजोधूमनिषेवणाच्च
छर्द्देर्व्विघाताद्वमनातियोगात् ॥
द्रवान्नपानान्निशि सेविताच्च
विण्मूत्रवातक्रमनिग्रहाच्च ।